दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-346 | 1 | अक्तूबर 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णदशमी
आश्विन् 19 प्रविष्ठांशः मङ्गलमयः भवेत्

2 कौशल-विकास-उद्यमिता-मन्त्रालयस्य प्रधानमन्त्री-सेतु इति योजना स्वीयं प्रथमं वर्षं पूर्णम् अकरोत्

4 बिहारस्य विश्वविद्यालयेषु सप्तभ्यः नूतन- पाठ्यक्रमेभ्यः स्वीकृतिः; उपाधिना सहैव लप्स्यते व्यावहारिकं प्रशिक्षणम्

8 प्रेमचन्दशरतचन्द्रस्मृतिप्रतियोगितायां १८० विजेतारः सम्मानिताः

# विकसितभारतस्य निर्माणाय सुशासनं

## अदृश्याधारभूतसंरचनायाः रूपे अस्ति - उपराष्ट्रपतिः




उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः प्राबल्येन अवदत् यत् निगम-अभिशासनम् आधुनिक-अर्थव्यवस्थायाः अदृश्या आधारभूतसंरचना अस्ति। नवदेहल्यां भारतीय कम्पनी-सचिव-संस्थानस्य-आई.सी.एस.आई. इत्यस्य अष्टपञ्चाशत्तमं स्थापनादिवसं सम्बोधयन् उपराष्ट्रपतिः अवदत् यत् विकसितभारतस्य निर्माणे सुदृढाः संस्थाः सुष्ठु शासनं च भौतिक्याः डिजिटल-आधारभूतसंरचनायाः च समानम् एव महत्त्वपूर्णं स्थानं भविष्यतः। राधाकृष्णन् महोदयः इदम् अपि अवदत् यत् निरन्तरायै आर्थिकप्रगतये निवेशकानां विश्वासः अनिवार्यः अस्ति इति। उपराष्ट्रपतिः उल्लिखितवान् यत् भारतं विश्वस्य द्रुततमं वर्धमानासु अर्थव्यवस्थासु अन्यतमम् अस्ति, युगपत् च द्रुतगत्या प्रौद्योगिकीप्रगतेः युगे प्रविशति । आई.सी.एस.आई. संस्थानस्य विषये भाषमाणः राधाकृष्णन् महोदयः देशे उत्तमस्य निगमशासनस्य प्रोत्साहने योगदानाय संस्थानं प्रशंसितवान्, तत् च स्थायिविकासस्य वैश्विकमानदण्डरूपेण वर्णितवान्। सः इतोऽपि अवदत् यत् भारतेन विश्वस्य बृहत्तमा अर्थव्यवस्था भवितुम् आकाङ्क्षा करणीया, न तु अन्येषाम् उपरि नियमानाम् आरोपणाय, अपि तु एतदर्थं यत् कोऽपि भारतस्य उपरि अनभीष्टान् नियमान् आरोपयितुं न शक्नुयात्।

# विदेशमन्त्री एस्, जयशङ्करः उदीयमानानां

## मध्यमानां च शक्तीनां परस्पर- सहयोगे बलं दत्तवान्




विदेशमन्त्री डॉ. एस. जयशङ्करः अवदत् यत् अन्ताराष्ट्रिया शान्तिः, सुरक्षा च, आपूर्तिशृङ्खलायाः सुदृढत्वं, सम्पर्कव्यवस्था च उदीयमान-मध्यम-शक्तीनां ई.एम.पी. इत्येतेषां कार्यसूच्याः महत्त्वपूर्णाः विषयाः सन्ति। नवदेहल्यां द्विषष्टितमे म्यूनिख-सुरक्षा-सम्मेलने भाषमाणः विदेशमन्त्री अवदत् यत् उदीयमानाः मध्यमाः च शक्तयः वैश्विकदक्षिणात् वैश्विकोत्तरात् च सन्ति, याः अधिकं प्रासङ्गिकत्वं प्राप्तुम् इति स्वलक्ष्ये एकीभूताः सन्ति। सः निर्दिष्टवान् यत् विश्वं परिवर्तते, तस्य कार्यसूची परिदृश्यं च परिवर्तते, उदीयमानानां मध्यमानां च शक्तीनां परस्परसहयोगाय च पर्याप्ता कार्यसूची विद्यते। डॉ. जयशङ्करः अवदत् यत् उदीयमानानां मध्यमानां च शक्तीनां स्वकीयस्य परस्परसहयोगस्य सुदृढीकरणे रुचिः अस्ति, परन्तु अमेरिकया चीनेन च सह तासां सहयोगः भवेत् इत्यपि स्वाभाविकम् एव। उदीयमानानां मध्यमशक्तीनाम् एकया उदितया शक्त्या सह सहयोगस्य उदाहरणरूपेण सः 'क्वाड' इत्यस्य उल्लेखम् अकरोत्। सः इतोऽपि अवदत् यत् सम्पर्कव्यवस्थायाः क्षेत्रे भारत-मध्यपूर्व-यूरोप-सम्पर्कमार्गः, अन्ताराष्ट्रियः उत्तर-दक्षिण-परिवहनमार्गः, उत्तरीयः समुद्रमार्गः च सन्ति ।

# तमिलनाडु-पुद्दुचेरी-पश्चिमबङ्ग-राज्येषु पञ्चानां विधानसभा-क्षेत्राणाम्, असमराज्ये एकस्य

### लोकसभाक्षेत्रस्य च उपनिर्वाचनानां कृते प्रचारः समाप्तः।

तमिलनाडु, पुद्दुचेरी, पश्चिमबङ्गाल राज्यानां पञ्चसु विधानसभासनेषु, असमस्य एकस्य लोकसभाक्षेत्रस्य च उपनिर्वाचनार्थं प्रचारः गतदिवसे समाप्तः। षट् आसनानां कृते मतदानं मंगलवासरे भविष्यति, शुक्रवासरे च मतानां गणना भविष्यति। विधानसभा-नैर्वाचनिक-समरांगणे तमिलनाडुराज्यस्य मदुरान्तकम्, धारापुरम्, पुद्दुचेरीनगरस्य थट्टाञ्चावडी, पश्चिमबङ्गालस्य रेजिनगर, नन्दीग्राम च अस्ति। असमराज्यस्य नागांव-लोकसभाक्षेत्रस्य कृते मतदानं भविष्यति।

# अद्यतनीयं सुभाषितम्

**यथा काष्ठं च काष्ठं च समे यातां महोदधौ।**
**समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥**

भावार्थः- जैसे समुद्र में दो काष्ठ के लट्ठे अपने आप बहते हुए चले जाते हैं और मिल कर फिर अलग हो जाते हैं इसी तरह (संसार में) प्राणियों का स्त्री, पुत्र, मित्रादि परिवार के साथ मिलना या जुदा होना होता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

# आन्ध्रप्रदेशे त्रि-आयामीय-कंक्रीट्-मुद्रण-प्रौद्योगिक्या त्रिलक्षगृहाणां निर्माणाय प्रायोगिकपरियोजनायाः

## शुभारम्भम् अकरोत् शिवराजसिंहचौहानः



केन्द्रीयकृषि-ग्रामविकास-मन्त्री शिवराज-सिंह-चौहानः अवदत् यत् राज्यस्य निर्धनपरिवारान् सुदृढ-गृहाणि प्रदातुं केन्द्रम् आन्ध्रप्रदेशस्य साहाय्यं करिष्यति। केन्द्रीयमन्त्रिणा मुख्यमन्त्रिणा एन. चन्द्रबाबु नायडु इत्यनेन च अद्य गुण्टूर-मण्डलस्य बुर्रिपालेम-ग्रामे 3डी-कॉंक्रीट्-मुद्रण-यन्त्रस्य उपयोगेन गृहनिर्माणस्य प्रायोगिक परियोजनायाः आरम्भः कृतः। अस्मिन् अवसरे श्रीचौहानः अवदत् यत् केन्द्रेण आन्ध्रप्रदेशस्य कृते त्रि-लक्ष-गृहाणि अनुमोदितानि, वर्तमानस्य निर्माणस्य समाप्तेः अनन्तरम् इतोऽपि त्रि-लक्ष-गृहाणि स्वीकृतानि भविष्यन्ति। सः अग्रे अवदत् यत्, सर्वकारः षण्मासेषु गृहाणां निर्माणकार्यं समापयितुं लक्ष्यीकरोति, तथा च निर्माणस्य गुणवत्तां, स्थिरतां च धारयति ।

# कौशल-विकास-उद्यमिता-मन्त्रालयस्य प्रधानमन्त्री-सेतु इति योजना स्वीयं प्रथमं वर्षं पूर्णम् अकरोत्

कौशल-विकास-उद्यमिता-मन्त्रालयस्य प्रधानमन्त्री-सेतु इति महत्त्वाकांक्षी योजना स्वीयं प्रथमं वर्षं पूर्णम् अकरोत्। गते वर्षे अस्मिन्नेव दिनाङ्के इयं योजना औद्योगिकाभ्यास-संस्थानाम् कायाकल्पाय प्रवर्तिता आसीत्। एतस्याः योजनायाः मुख्यम् उद्देश्यम् उद्योग-सञ्चालित-प्रशासनस्य सुदृढीकरणम्, प्रशिक्षण-संरचनायाः आधुनिकीकरणम्, आधुनिक श्रमिक-आवश्यकतानुसारं च 'याचना-आधारित-पाठ्यक्रमाणां' प्रवर्त्तनम् अस्ति। षष्टि-सहस्र-कोटि-रूप्यकाणां आहत्य-व्यय-अनुमानेन निर्मितायाः अस्याः योजनायाः कृते केन्द्रेण त्रिंशत्-सहस्र-कोटिः, राज्यैः विंशति-सहस्र-कोटिः, उद्योग-क्षेत्रेण च दश-सहस्र-कोटि-रूप्यकाणां वित्तीय-योगदानं प्रदीयते।

# जापानदेशस्य नागोयानगरे एशियाई-क्रीडाः समाप्ताः; भारतं समग्रपदकतालिकायां चतुर्थ स्थानं प्राप्तवत्




ऐषमः वर्षस्य एशियाई-क्रीडाः नागोयानगरस्य 'नागोया सिटी मिज़ुहो पार्क एथ्लेटिक स्टेडियम' इति क्रीडाङ्गणे औपचारिकरूपेण समाप्ताः। एवं त्रिचत्वारिंशत्-क्रीडाविधासु सप्ताहद्वयाधिकं यावत् प्रचलिताः रोमाञ्चकाः स्पर्धाः समाप्तिं गताः। एशिया-ओलम्पिक-परिषदः अध्यक्षः क्रीडानां समाप्तिम् औपचारिकरूपेण घोषितवान्, येन अस्य महाद्वीपीयस्य क्रीडामहोत्सवस्य स्मरणीयं संस्करणं सम्पन्नम्। प्रथमानाम् एशियाई-क्रीडानां औपचारिकी करदीपः ध्वजः च कतरदेशस्य प्रतिनिधिभ्यः समर्पितौ। कतरदेशः त्रिंशदधिक-द्विसहस्र तमे वर्षे दोहानगरे आगामिसंस्करणस्य आतिथ्यं करिष्यति। अनेन समर्पणेन 'नागोया २०२६' इत्यस्मात् 'दोहा २०३०' प्रति औपचारिकं हस्तान्तरणं सम्पन्नम्। भारतीया लक्ष्यवेधिनी नीरू ढाण्डा, या एतासु क्रीडासु द्वे स्वर्णपदके एकं रजतपदकं च जितवती, समापनसमारोहे देशस्य ध्वजवाहिकारूपेण भारतीयध्वजं धृतवती। भारतं समग्रपदकतालिकायां चतुर्थं स्थानं प्राप्तवत्। भारतेन प्रभावशालीनि पञ्चाशीतिः पदकानि जितानि, येषु एकविंशतिः स्वर्णपदकानि, सप्तविंशतिः रजतपदकानि, सप्तत्रिंशत् कांस्यपदकानि च सन्ति।



## भारतीय-संसदीय प्रतिनिधिमण्डलं-अन्तरसंसदीय संघस्य त्रि-पञ्चाशदुत्तरैकशततम्याम् सभायां तत्सम्बद्धोपवेशनेषु च भागं गृहीतुं तन्जानिया-देशं प्रति प्रस्थितवान्

राज्यसभायाः उपसभापतेः हरिवंशस्य नेतृत्वे एकं भारतीय-संसदीय प्रतिनिधिमण्डलं-अन्तरसंसदीय संघस्य त्रि-पञ्चाशदुत्तरैक-शततम्याम् सभायां तत्सम्बद्धोप-वेशनेषु च भागं गृहीतुं तन्जानिया-देशं प्रति प्रस्थितवान्, एतानि उपवेशनानि मासस्य अस्य पञ्च तारिकातः नवदिनांक-पर्यन्तं आयोज्यन्ते। एतत् प्रतिनिधिमण्डलं समकालीन-वैश्विक महत्वस्य विषयेषु विविधासु सभासु, विचारगोष्ठीषु, कर्मशालासु च भागं गृहीष्यन्ति, एतेषु विषयेषु भारतस्य दृष्टिकोणं स्पष्टं वक्ष्यति। श्रीहरिवंशः शासी परिषदः, सामान्य वादविवादस्य-आपतकालीन-विषयक-वादविवादस्य तथा च संसदीय संघस्य अध्यक्षपदस्य अभ्यर्थिनां श्रावणस्य च कार्यक्रमेषु भागं ग्रहीष्यति।

## भारत-ऋतु-विज्ञान-विभागेन पृथक-पृथक स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति

भारत-ऋतु-विभागेन केरलम, माहे, तमिलनाडु, पुद्दुचेरी, कराईक्काल-क्षेत्रेषु च पृथक-पृथक स्थानेषु श्वः यावत् प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामि-दिनेषु मराठवाडा-विदर्भयोः शेषभागेषु, महाराष्ट्र-छत्तीसगढ्योः केषुचित भागेषु, तेलङ्गाना-राज्ये, कर्नाटकस्य उत्तरान्तरिकक्षेत्रेषु च नैर्ऋत्य-प्रावृट्कालस्य पुनरागमनस्य स्थितिः अनुकूलः भवितुम् अर्हति इति विभागेन उक्तम्। विभागेन उक्तं यत् आगामि-दिनद्वयोः आन्ध्रप्रदेशे, तमिलनाडु पुद्दुचेरी, कराईक्काल-क्षेत्रेषु च मेघगर्जनस्य, विद्युत-स्खलनस्य च स्थितिः अनुवर्तते।

## "राष्ट्रीय-महागणक-अभियानान्तर्गते भारतेन स्वदेशी-महागणन-पारिस्थैतिक-तन्त्रं संस्थापितम्

सर्वकारेण कथितं यत् राष्ट्रीय-महागणक-अभियानस्य अन्तर्गतं भारतेन महागणने (Supercomputing) आत्मनिर्भरतां प्राप्तुं केन्द्रितम् एकं पारिस्थैतिक-तन्त्रं संस्थापितम् अस्ति। अस्मिन् महागणकस्य रूपरेखा , विकासः, निर्माणम्, तन्त्र-तन्त्रांशः तथा विशिष्टाः प्रयोगाः च सम्मिलिताः सन्ति। इयं वर्धमाना स्वदेशी क्षमता आयातितासु प्रौद्योगिकीषु निर्भरतां न्यूनीकृत्य भारतस्य आभ्यन्तरम् उच्च-दक्षता-सङ्गणन-पारिस्थैतिक-तन्त्रं सुदृढं करिष्यति।



## कौटिल्य-आर्थिक-सम्मेलनम्

# भारतस्य सुदृढ-आर्थिक-स्थिरता वित्तीयपरिष्कारश्च

साङ्ख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयस्य सचिवेन सौरभ-गर्गेण उक्तं यत् भारतस्य निरन्तरा आर्थिक-दृढता, बलोपेतं कार्पोरेट्-प्रदर्शनं तथा च सततं निवेश-गतिविधयः इदानीं विभिन्न-अन्ताराष्ट्रिय-संस्थाभिः देशस्य विकास-अनुमानेषु कृतायां वृद्धौ प्रतिफलन्ति। नवदेहल्यां कौटिल्य-आर्थिक-सम्मेलनावसरे (कॉन्क्लेवे) पत्रकारैः सह सम्भाषणे श्रीगर्गेण प्रतिपादितं यत् २०२६-२७ वित्तवर्षस्य प्रथमायां त्रैमासिक्यां ७.८ प्रतिशतं वृद्धिं प्राप्य भारतीय-अर्थव्यवस्थया स्वकीयः वेगः सुरिक्षतः।तेन कथितं यत् सुदृढं कार्पोरेट्-प्रदर्शनं तथा च निजी-क्षेत्रेण सह निरन्तरः पूँजी-निवेशः सकारात्मक-आर्थिक-प्रवृत्तेः प्रमुखेषु सङ्केतकेषु अन्तर्भवन्ति। सः अवदत् यत् एषः वेगः एस-एण्ड्-पी-ग्लोबल्-रेटिङ्ग्स तथा फिच्-रेटिङ्ग्स इत्येताभिः सहिताभिः अन्ताराष्ट्रिय-रेटिङ्ग-संस्थाभिः शोध-संस्थाभिः च भारतस्य विकास-अनुमानेषु सम्प्रति कृतायां वृद्धौ अपि दृश्यते।पश्चिम-एशिया-क्षेत्रे तनावस्य प्रभावं वैश्विक-तैल-मूल्येषु सहसा उत्पन्नायाः अस्थिरतायाः च सङ्कटान् अधिकृत्य चर्चयन् श्रीगर्गः अकथयत् यत् सर्वकारस्य हस्तक्षेपेण सहैव परिवारैः निजी-क्षेत्रेण च गृहीतैः पदक्षेपैः भारतीय-अर्थव्यवस्थायां बाह्याघातानां प्रतिकूल-प्रभावान् सीमितीकर्तुं साहाय्यं कृतम्।अपरपक्षे, प्रधानमन्त्रिणः प्रधान-सचिव-द्वितीयेन शक्तिकान्त-दासेन प्रतिपादितं यत् सम्प्रति वर्षेषु भारतस्य आर्थिक-दृढतायाः प्रधानं कारणं वित्तीय-क्षेत्रे अभूतपूर्वाः सुधाराः एव सन्ति। सः अवदत् यत् शोधनाक्षमता-दिवालिया-संहिता, बैङ्कानां पुनर्पूंजीकरणं तथा च निर्माणात्मिका नियामकीय-पर्यवेक्षणा सदृशैः सुधारैः भारतस्य वित्तीय-क्षेत्रम् आर्थिक-विकासस्य एकः सुदृढः स्तम्भः भूत्वा समुद्भूतम्। अद्य नवदेहल्याम् आयोजिते कौटिल्य-आर्थिक-सम्मेलने २०२६ इत्यत्र सम्बोधयन् श्रीदासेन ज्ञापितं यत् अस्मिन् वर्षे जून्-मासे सकल-अनिष्पादित-परिसम्पत्तयः (जीएनपीए) न्यूनीभूय १.६८ प्रतिशतं प्राप्ताः, यदा तु बैङ्कानां लाभप्रदतायाम् उल्लेखनीयः सुधारः संजातः। श्रीदासेन उक्तं यत् बाह्य-क्षेत्रस्य विवेकपूर्ण-प्रबन्धनेन अपि भारतस्य बृहत्-आर्थिक-स्थिरतायाः (मैक्रो-इकनॉमिक-स्टेबिलिटी) प्रयासेभ्यः बलं प्रदत्तम्। सः न्यवेदयत् यत् निर्यातस्य निरन्तर-विविधीकरणेन, मुक्त-व्यापार-अनुबन्धानां सम्पन्नतया तथा च सेवा-व्यापारे सततं लाभ-अधिशेषेण (सर्प्लस्) इत्यादिभिः कारणैः भारतस्य बाह्य-क्षेत्रस्य सङ्केतकाः व्यापकतया सुदृढाः एव सन्ति। श्रीदासेन प्रतिपादितं यत् २०२५-२६ वर्षस्य कृते चालू-खाता-न्यूनता (कैड्) सकल-घरेलू-उत्पादस्य ०.६ प्रतिशत-मितेन प्रबन्धनीये स्तरे एव वर्तते।

# निर्विरोध-निर्वाचितेभ्यः पञ्चायतेभ्यः प्रदेश- सर्वकारस्य महती कृपा; १३६ ग्राम-पञ्चायतेभ्यः प्राप्स्यन्ते ३४ कोटि-रूप्यकाणि



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-सर्वकारस्य पञ्चायतीराज- विभागेन वर्ष- २०२६ तमे वर्षे पञ्चायतीराज- संस्थानां सामान्यनिर्वाचनेषु (निर्विरोधम्) निर्वाचितेभ्यः ग्राम-पञ्चायतेभ्यः चतुस्त्रिंशत्- कोटि- रूप्यकाणां (३४ कोटि) प्रोत्साहन-राशिः विमुक्ता कृता। विभागपक्षतः निर्गत- स्वीकृति- आदेशानुसारं राज्यस्य षट्त्रिंशदधिक-शतम् (१३६) निर्विरोध-चयनित-ग्राम-पञ्चायतेभ्यः प्रति- पञ्चायतं पञ्चविंशति-लक्ष-रूप्यकाणां (२५ लक्ष) दरेण इदम् अनुदानं प्रदास्यते।

पञ्चायतीराज-विभागेन विज्ञापित-विवरणानुसारं सर्वाधिकं द्विचत्वारिंशत् (४२) निर्विरोध- ग्राम-पञ्चायतयः शिमलामण्डले चिताः, याभ्यः साकल्येन १०.५० कोटि-रूप्यकाणां प्रोत्साहन-धनं प्राप्स्यते।

**मण्डल-वारं स्वीकृत-प्रोत्साहन-अनुदानम्**

**सिरमौर-मण्डलम्-** सप्तविंशति-पञ्चायतेभ्यः (२७) ६.७५ कोटि-रूप्यकाणि

**किन्नौर-मण्डलम्-** अष्टादश-पञ्चायतेभ्यः (१८) ४.५० कोटि-रूप्यकाणि (आदेशे उल्लेख-भेदानुसारम्)

**लाहौल-स्पीति-मण्डलम्-** सप्तदश-पञ्चायतेभ्यः (१७) ४.२५ कोटि-रूप्यकाणि

**सोलन-मण्डलम्-** त्रयोदश-पञ्चायतेभ्यः (१३) ३.२५ कोटि-रूप्यकाणि

**कुल्लू-मण्डी-ऊना-मण्डलानि-** प्रत्येकस्मिन् पञ्च- पञ्च (५-५) पञ्चायतेभ्यः १.२५-१.२५ कोटि-रूप्यकाणि

**काङ्गड़ा-मण्डलम्-** द्वे पञ्चायते कृते ५० लक्ष-रूप्यकाणि

**चम्बा-बिलासपुर-मण्डले-** प्रत्येकस्मिन् एकस्याः पञ्चायतः कृते २५-२५ लक्ष-रूप्यकाणि

विभागेन स्पष्टीकृतं यत् सम्बद्धाभिः ग्राम-पञ्चायतिभिः इयं प्रोत्साहनराशिः २८ सितम्बर दिनाङ्के निर्गतानां दिशानिर्देशानाम् अनुसारेणैव विकासकार्येषु व्ययीकरणीया भविष्यति।

# देहली-नगरे अक्टूबर-मासस्य तृतीयायां तिथौ सम्पन्ना अभवत् परिवर्तन-योगेश-संस्थायाः अष्टत्रिंशत्तमं (३८तमं) सुदर्शन-सभा



**हिमसंस्कृतवार्ता,नवदेहली।**

मानितस्य राष्ट्र-संस्कृति-समाज-हिताय समर्पितस्य 'परिवर्तन-योगेश'-संस्थानस्य अष्टत्रिंशत्तमा (३८तमा) सुदर्शन-सभा २०२६ तमस्य वर्षस्य अक्टूम्बर-मासस्य तृतीयायां तिथौ देहली-नगरे सम्पन्ना। इयं सभा परिवर्तन-योगेश-संस्थानस्य उप-सङ्घटनस्य महर्षि-सत्य-सनातन-हिन्दी-विद्यापीठस्य 'विद्या-वाचस्पति' तथा 'विद्या-सागर' मानदोपाधि-प्रदानेन सम्पन्ना अभवत्। मुख्य-अतिथयः आसन्— सद्गृहस्थ-सन्तः डॉ. हरीश-मिश्रः (राष्ट्रीय-अध्यक्षः : परिवर्तन-योगेशः), डॉ. योगेश-तरेहनः (संस्थापकः : परिवर्तन-योगेशः), महामण्डलेश्वरः निरङ्कार-नन्द-महाराजः (पीठाधीश्वरः : महर्षि-सत्य-सनातन-अखाड़ा), डॉ. प्रशान्त-मनोहर-गायकवाडः (तवला-वादकः ज्योतिषाचार्यः च) तथा डॉ. रविकुमार-द्विवेदी (कुलपतिः : महर्षि-सत्य-सनातन-हिन्दी-विद्यापीठम्)।अस्यां सभायां देशस्य त्रिभ्यः (३) विप्रभ्यः 'विद्या-सागर' उपाधिः प्रदत्तः। तेषां नामानि सन्ति— डॉ. भभुता-राम-चौहानः, डॉ. लोकेश-कुमारः तथा डॉ. यशदेव-प्रसाद-शर्मा च। त्रयस्त्रिंशत् (३३) महानुभावेभ्यः 'विद्या-वाचस्पति' उपाधिः समर्पितः, येषां नामानि सन्ति— सञ्जय-हरिहरनाथ-त्रिपाठी, प्रमोद-तिवारी, शम्भु-नाथ-दुबे, राहुल-कपूरः, विजय-प्रकाश-दीक्षितः, प्रभात-अग्रवालः, शङ्कर-कुमार-मिश्रः, चन्द्र-मोहन-बाली, यश-अवस्थी, महामण्डलेश्वरी मञ्जु-वर्मा, श्रीमती रेखा-मुकुल-चौबे, विवेका-कुमार-सिन्हा, डॉ. जितेन्द्र-माधवः, कुलजीत-सिंहः, श्री दर्शन-दिलीपराव-जोशी, रामेश्वर-सिंह-शाण्डिल्यः, श्रीमती शुभाङ्गी-शाण्डिल्या, कृष्ण-कान्त-दूबे, महर्षिः श्री राजेन्द्र-प्रसाद-विश्वकर्मा, प्रकाश-चन्द्र-पण्ड्या, सुरेश-चन्द्र-जोशी, डॉ. जितेन्द्रकुमार-बाबूलाल-प्रजापतिः, शिव-शङ्कर-शर्मा, टीकादास-मराबी, विनोद-राजपूतः, देवेन्द्र-सिंह-आर्यः, विष्णु-सिकरवारः, धनञ्जय-सिंहः, सुन्दर-पाल-यादवः, कमलेश-कुमार-मिश्रः, परमार-कुञ्जलता-सुरसिंहः, देश-दीपक-शर्मा तथा पङ्कज-कुमार-दीक्षितः च।सभायां प्रसिद्धया नृत्याङ्गनया श्रीमत्या कल्पना-शर्म-महोदयया कथक-नृत्यस्य प्रस्तुतिः कृता, तस्यै 'कला-शिरोमणि'-सम्मानः प्रदत्तः; तथा च राष्ट्रपतेः सम्मान-प्राप्तकर्त्रे 'गिनीज-वर्ल्ड-रिकॉर्ड'-धारक-प्रसिद्ध-तवला-वादक-ज्योतिषाचार्याय डॉ. प्रशान्त-मनोहर-गायकवाड-महोदयाय 'सनातन-गौरव'-सम्मानः समर्पितः।व्यवस्था-समित्याः सदस्याः एते आसन्— पत्रकारः सञ्जय-कुमारः, सुनील-दुग्गलः, डॉ. टीकम-सिंहः, डॉ. यशदेव-प्रसाद-शर्मा, आचार्यः डॉ. देव-कुमार-पाण्डेयः, राकेश-कुमारः तथा गिरिराज-सिंहः च।



# देहल्याः पञ्जाब-पर्यन्तं पुनः वर्षिष्यन्ति मेघाः; हिमाचल-उत्तराखण्डयोः गर्जन- विद्युल्लता-सहित- वृष्टेः सम्भावना

**हिमसंस्कृतवार्ताः- नवदेहली।**

हरियाणाराज्ये, चण्डीगढे, देहल्यां, पञ्जाबे च षष्ठ-अक्तूबर दिनाङ्कतः पुनः एकदा वृष्टेः क्रमः प्रारब्धुं शक्नोति। भारत-ऋतुविज्ञान-विभागेन दीर्घकालव्यापि-शुष्क-ऋतु अनन्तरं ६ तः १० अक्तूबर पर्यन्तम् एतेषु क्षेत्रेषु क्वचित्-क्वचित् वृष्टेः पूर्वानुमानं प्रकटितम्। ऋतु-विभागस्य अखिल-भारतीय- ऋतु- सारांश- पूर्वानुमान-वार्तानुसारं ६ तः १० अक्टूबर् दिनाङ्कानां मध्ये हरियाणा, चण्डीगढ, देहली, पञ्जाबक्षेत्रेषु विरलवृष्टिः भवितुं शक्नोति। वातावरण- परिवर्तनात् पूर्वं ४ तथा च ५ अक्टूबर् दिनाङ्कयोः अस्मिन् समग्रे क्षेत्रे ऋतुः प्रायशः शुष्कः एव स्थास्यति।

## सामान्यतः अधिकम् अस्ति न्यूनतम-तापमानम्

ऋतु-विभागेन इदम् अनुमानं तादृशे समये उपस्थापितं यदा हरियाणा, चण्डीगढ, पञ्जाबक्षेत्रेषु तापमानं सामान्यात् भृशम् अधिकं वर्तते। ऋतुविभागेन विज्ञापितं यत् हरियाणाराज्ये, चण्डीगढे, देहल्यां, पञ्जाबे च केषुचित् स्थानेषु न्यूनतमतापमानं सामान्यतः ३.१°C तः ५°C यावत् अधिकं पञ्जीकृतम्। तथैव अन्येषु स्थानेषु अपि तापमानं सामान्यतः १.६°C तः ३°C यावत् अधिकम् आसीत्। यद्यपि ऋतु-विभागेन हरियाणा-पञ्जाबयोः अतिवृष्टेः कोऽपि सङ्केतः न दत्तः, नापि च विभीषिकायाः काचित् चेतावनी निर्गता; तथापि हिमालयस्य समीपे विद्यमानेषु पार्वत्यक्षेत्रेषु वातावरणीय- गतिविधयः अधिकतीव्राः भविष्यन्ति।

## हिमाचल-उत्तराखण्डयोः गर्जन- विद्युल्लता- सहितवृष्टिः

हिमाचलप्रदेशः उत्तराखण्डश्च ५ तः १० अक्टूबर् मध्ये तयोः विरल-वृष्टिः सम्भाविता। विशेषतया ६ तः ८ अक्तूबर पर्यन्तं हिमाचले, ५ तः ७ अक्टूबर् पर्यन्तं च उत्तराखण्डे विद्युत्-सम्पातेन सह ३०-४० कि.मी./ घण्टा (वेग-झंझा ५० कि.मी./ घण्टा यावत्) तीव्रगत्या वातानां वाहितेन सह झञ्झावातस्य (आंधी-तूफान) सम्भावना अस्ति। जम्मू-कश्मीरं लद्दाखश्च ६ तः ८ अक्तूबर पर्यन्तं क्वचित्-क्वचित् वर्षणं भविष्यति, तदनन्तरं ९-१० अक्तूबर दिनाङ्कयोः विस्तीर्णे क्षेत्रे व्यापक-वृष्टेः आसारः वर्तते। ऋतोः इदं परिवर्तनं दक्षिण-पश्चिम-वर्षर्तोः निर्गमनेन सहैव सञ्जायमानम् अस्ति। ऋतु-विभागेन प्रतिपादितं यत् आगामिषु दिनद्वये दिनत्रये वा परिस्थितयः अनुकूलाः भविष्यन्ति, येन वर्षर्तोः प्रत्यागमनं मराठवाड़ा- विदर्भयोः अधिकांशभागेभ्यः, महाराष्ट्र-छत्तीसगढ़योः, तेलङ्गाना- उत्तर- कर्णाटकयोश्च कतिपयक्षेत्रेभ्यः द्रुतगत्या सम्पूर्णं भविष्यति।

# कर्कट-यक्ष्म-रोगाभ्यां (कैंसर-टीबी) सह योद्धुं जन-जागरूकता एव महत्तरम् आयुधम्- राज्यपालः





### महावीर-कर्कटरोग-संस्थाने कर्कट-यक्ष्म- प्रबोधन- अभियानस्य शुभारम्भः; राज्यपालेन प्रतिपादितं यत् जाति-धर्मभावम् उपेक्ष्य निष्काम- सेवाभावेन करणीयः रुग्णानाम् उपचारः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना। राज्यपालः लेफ्टिनेण्ट- जनरल- सैयद- अता-हसनैन-महोदयः प्रोवाच यत् कस्यापि व्याधेः पराजयाय जन-जागरूकता एव प्रधानतमम् अस्त्रं वर्तते। 'कोविड'-विभीषिकायाः कालेऽपि जागरूकता रोगाद् रक्षणे महती सहायिका सिद्धा आसीत्। समये सति रोगस्य परिज्ञानेन समीचीन-चिकित्सया च रुग्वान् दारुण-दुःखाद् रक्षितुं शक्यते। राज्यपालः शनिवासरे 'महावीर-कर्कटरोग- संस्थानं' 'रोटरीक्लब- पटना-मिलेनियम्' इत्येतयोः संयुक्ताश्रयेण आयोजितायाः कर्कट- यक्ष्म- जागरूकतायात्रायाः उद्घाटनसमारम्भे भाषणं कुर्वन् आसीत्। सः निगदितवान् यत् रुग्णानाम् उपचारः जाति- धर्म-सम्प्रदायभेदान् विहाय निष्काम- सेवाभावेन विधेयः। चिकित्साकाले सर्वविधं भेदभावं विस्मृत्य पीडितः जनः केवलं भारतवासी इति दृष्ट्या एव द्रष्टव्यः। तेन महावीर-कर्कट-रोग-संस्थानस्य सेवा-व्रतस्य भूयसी प्रशंसा कृता। सः अवोचत् यद् इदं संस्थानं निर्धनेभ्यः कर्कट-पीडितेभ्यश्च स्वल्प-व्ययेन उत्तमां चिकित्सां प्रयच्छति। बाल-कर्कट-रोगिभ्यः अत्र निःशुल्क-चिकित्सा-व्यवस्था वर्तते। राज्यपालेन विशेषतः महिलासु स्तन-कर्कटरोगं (ब्रेस्ट कैंसर) प्रति प्रबोधनस्य परमावश्यकता प्रतिपादिता। तेनोक्तं यत् समयबद्धपरीक्षणेन रोगस्य शीघ्रनिदाने कृते सति उपचारस्य साफल्यं सुनिश्चितं भवति; अतः जनैः स्वास्थ्य-विषये सतत-जागरूकैः भूत्वा समये समये देह-परीक्षणं कारणीयम्।

### अष्टशत-शय्यानां (८०० बेड) भविष्यति सुविस्तीर्णा व्यवस्था

'श्रीमहावीर- स्थानन्यास-समित्याः' सचिवः सायण कुणालः प्रत्यपादयत् यद् बिहारस्य कर्कट-रुग्णाः चिकित्सार्थं बहिः गन्तुं विवशाः न भवेयुः, अस्यैव पवित्रोद्देश्यस्य पूर्तये तस्य पूज्यपितृपादैः आचार्य-किशोरकुणालमहोदयैः संस्थानस्यास्य शिलान्यासः कृतः आसीत्। बाल-कर्कट-रोगिणां कृते पृथक्तया शत-शय्या-युक्तस्य (१०० बेड) चिकित्सालयस्य निर्माणं द्रुतगत्या प्रचलति। वर्तमान- चिकित्सालयेऽपि अपराः शतम् अतिरिक्ताः शय्याः संविधीयन्ते। तदनन्तरम् अत्र प्रायः अष्टशत- शय्यानां (८००) महती सौविध्य-सम्पत्तिः उपलब्धा भविष्यति।

तेन संसूचितं यत् महावीरमन्दिरस्य पक्षतः अयोध्यायां 'रामरसोई', सीतामढ्यां 'सीता-रसोई', गयाधाम्नि 'विष्णुरसोई', पाटलीपुत्रे च 'महावीररसोई' इति निःशुल्क-अन्नक्षेत्राणि निरन्तरं सञ्चाल्यन्ते। अयोध्यायां प्रतिदिनं दश-सहस्रतः द्वादश-सहस्रजनेभ्यः निःशुल्कं भोजनं दीयते। कैथवलियाक्षेत्रे विंशत्यधिकशतम् (१२०) एकड़-परिमितभूभागे विराट-रामायणमन्दिरस्य निर्माणम् अपि प्रचलति, यत्र त्रयस्त्रिंशत्- पाद- परिमितः (३३ फीट) उच्चः विशालः शिवलिङ्गः सम्प्रति प्रतिष्ठितः कृतः अस्ति।

### 'नरसेवा एव नारायणसेवा'

महावीर- कर्कट-रोग-संस्थानस्य अधीक्षकः डॉ. एल. बी. सिंहः प्रोवाच यत् नरसेवा एव वस्तुतः नारायणसेवा वर्तते। आचार्य- किशोर- कुणाल-महोदयस्य सेवा-परम्परायाः अग्रे प्रवहणं महद् उत्तरदायित्वम् अस्ति। सः अवदत् यद् बिहारस्य कर्कटरुग्णेभ्यः इदं संस्थानम् आशायाः देदीप्यमानं किरणम् अस्ति। १९९८ तमे वर्षे दिसम्बर-मासस्य १२ दिनाङ्के स्थापितस्य अस्य संस्थानस्य माध्यमेन अद्य यावत् लक्षशः रुग्णाः स्वास्थ्य-लाभं प्राप्तवन्तः।

तेन प्रतिपादितं यत् समये सति कर्कट-रोगस्य यक्ष्मणश्च (टीबी) परस्परं सम्बन्धः अपि दृश्यते; अतः उभाभ्यां रोगाभ्यां मुक्तिं लब्धुं लोक-जागरूकता परमावश्यकी।

संस्थानस्य चिकित्सा-निदेशिका डॉ. मनीषासिंहः प्रत्यपादयत् यत् कर्कट-सदृशस्य दारुणस्य रोगस्य प्रारम्भावस्थायां परिज्ञाने सति सः बहुशः नियन्त्रणयोग्यः भवति।

समारोहे 'रोटरी-क्लब' संस्थायाः अनु नारङ्ग, राजेश कुमारः इतरे च बहवः प्रमुखाः गण्याः मान्याश्च उपस्थिताः आसन्।



# बिहारस्य विश्वविद्यालयेषु सप्तभ्यः नूतन- पाठ्यक्रमेभ्यः स्वीकृतिः; उपाधिना सहैव लप्स्यते व्यावहारिकं प्रशिक्षणम्

## चतुर्वर्षीय-स्नातक-पाठ्यक्रमे वृत्ति-शिक्षुतायाः सुयोगः; उच्चशिक्षां वृत्त्या सह सम्बद्धीकर्तुं नूतनप्रक्रमः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना।

बिहारराज्यस्य विश्वविद्यालयेषु उच्चशिक्षां कौशलसम्पन्नां वृत्त्युन्मुखीं च विधातुं सप्त (७) नूतनान् पाठ्यक्रमान् आरब्धुं स्वीकृतिः प्रदत्ता। एतेषां पाठ्यक्रमाणां माध्यमेन छात्रेभ्यः चतुर्वर्षीय-स्नातकोपाधिना सहैव सम्बद्धक्षेत्रेषु व्यावहारिक-प्रशिक्षणस्य वृत्ति-शिक्षुतायाश्च अवसरोपलम्भनस्य महती योजना वर्तते। अस्यां नूतनव्यवस्थायां विद्यार्थिनः केवलं सैद्धान्तिक- ज्ञानेनैव परिसीमिताः न भवेयुः, प्रत्युत ते अध्ययनकाले एव कार्यक्षेत्रस्य प्रत्यक्षम् अनुभवं लभेरन् इत्यत्र विशेषः बलः दत्तः। वृत्ति-शिक्षुतामाध्यमेन छात्राः स्व-स्व-विषयसम्बद्धासु संस्थासु कार्यस्थलेषु च व्यावहारिकदक्षतां प्राप्स्यन्ति। अनेन उपाधिना सहैव कार्यकौशलस्य अनुभवस्य च समुपलब्धिः सुलभा भविष्यति।

### अध्ययन-नियोजनयोः मध्यवर्ति-दूरीं न्यूनीकर्तुं श्लाघ्यः प्रयासः

सप्तनूतनपाठ्यक्रमाणां शुभारम्भः उच्चशिक्षायाः परिवर्तिताभिः औद्योगिक- आवश्यकताभिः सह संयोजनस्य एका महत्त्वपूर्णा पहलः मन्यते। वर्तमाने समये विद्यार्थिभ्यः केवलं शैक्षणिकयोग्यता न पर्याप्ता, अपि तु व्यावहारिकनैपुण्यं कार्यकौशलञ्चापि परमावश्यकं जातम्। नूतनव्यवस्था अस्या एव आवश्यकतायाः पूर्तये सज्जीक्रियते। चतुर्वर्षीय-उपाधि-कार्यक्रमे विषयाध्ययनेन सह व्यावहारिक- प्रशिक्षणस्य वृत्तिशिक्षुतायाश्च समावेशः छात्रान् व्यवसाय-जगतः कृते अधिक- समर्थान् योग्यतरांश्च विधातुं परमोपयोगी सिद्धः भविष्यति।

### गुणवत्तापूर्णे प्रशिक्षणे स्थास्यति विशेष-दृष्टिः

अस्याः नूतन-व्यवस्थायाः साफल्यम् एतदधीनं भविष्यति यत् विश्वविद्यालयेषु पाठ्यक्रमाणां सञ्चालनं, प्रशिक्षणं, वृत्ति-शिक्षुतायाश्च प्रबन्धः कियता प्रभावेण भूतले अवतरति। यदि विद्यार्थिभ्यः गुणवत्तापूर्णं शिक्षणं वास्तविक- कार्यक्षेत्रस्य चानुभवः प्रदास्यते, तर्हि अस्य लाभः उच्चशिक्षायाः उन्नयनेन सहैव युवततेः नियोजनेऽपि भविष्यति।

सप्तानाम् अपि पाठ्यक्रमाणां नामानि, सम्बद्ध-विश्वविद्यालयेषु तेषां सञ्चालनविधिः, प्रवेशप्रक्रिया, वृत्ति-शिक्षुतायाश्च नियमावली समधिकृत्य विस्तृत-मार्गदर्शिकायाः प्रकाशनानन्तरमेव समग्रं चित्रं स्पष्टीभविष्यति।

# बिहार-राज्ये ग्रामीणोद्योगानां संवर्धनाय सज्जता आय-व्ययकपत्रे (बजट) घोषणानां सम्भावना



## लघु-व्यवसायेभ्यः स्थानीय-उत्पादेभ्यश्च प्रोत्साहनप्राप्तेः आशा; आजीविका-अवसराणां नूतन-सृजने बलं दीयते।

**हिमसंस्कृतवार्ताः राघव नाथ झा, पटना**

बिहार-राज्यस्य ग्रामीण-क्षेत्रेषु वृत्ति-नियोजनस्य अवसरांश्च संवर्धयितुं, स्थानिकस्तरे च आर्थिक-क्रियाकलापान् गतिशीलांश्च विधातुं लघूनां सूक्ष्माणाञ्च उद्योगानां प्रोत्साहनाय सर्वकार-पक्षतः नूतनप्रक्रमस्य सम्भावना समुपलक्ष्यते। आगामिनि आय-व्ययकपत्रे (बजट) ग्रामीणोद्योगेभ्यः लघु-वाणिज्यिकेभ्यश्च कानिचन महत्त्वपूर्णानि विधानानि स्युः इति प्रत्याशा वर्तते।

प्रस्तावित-प्रयासस्य मुख्यं लक्ष्यम् एतादृशाः लघु-व्यवसायाः भवितुम् अर्हन्ति, येषु न्यून-धनेनापि स्थानीयस्तरे वृत्तिसृजनं सुकरं स्यात्। ग्राम्य-क्षेत्रेषु समुपलब्ध- संसाधनानि पारम्परिक-उत्पादांश्च समाश्रित्य प्रचलद्भिः उद्योगैः स्थानीय-अर्थव्यवस्था सुदृढा भविष्यति, जीविकार्थं जायमानस्य जनप्रवासस्य निवारणेऽपि महती सहायता लप्स्यते। लघु-उद्यमिभ्यः सम्प्राप्स्यते साहाय्यम्। आयव्ययकपत्रे लघु-उद्यमशीलेभ्यः जनेभ्यः वित्तीयसाहाय्यं, प्राविधिकप्रशिक्षणं, विपणि-व्यवस्थापनं, व्यवसाय-प्रवर्तनप्रक्रियायाः सरलीकरणञ्च समधिकृत्य कतिचन विशिष्टाः प्रावधानाः भवेयुः इति सम्भाव्यते। अनेन युवततेः, शिल्पिनां, लघु-व्यापारिणाञ्च स्व-स्व-क्षेत्रेष्वेव स्वरोजगारस्य अवसराः संवर्धिष्यन्ते।

### स्थानीय-उत्पादानां विपण्या सह सम्बन्धे विशेषः अवधानः

ग्रामीण-परिवेशेषु निर्मितानां हस्तशिल्पानां, खाद्य- पदार्थानां, वस्त्राणां, काष्ठ-सामग्रीणां, इतरेषाञ्च देशज- उत्पादानां कृते श्रेष्ठतरा विपणि-व्यवस्था विधातव्या इत्यत्रापि विशेषः बलो दास्यते। स्थानीयनिर्माणं विपण्या सह सम्बद्धीकर्तुं यदि सुदृढा कार्यप्रणाली प्रवर्तेत, तर्हि लघु-व्यवसायिनाम् आयवृद्धौ नूतन-वृत्तिसृजने च महत्तरः लाभः भविष्यति।

### आय-व्ययक-पत्रेणैव स्फुटीभविष्यति सर्वकारस्य दिशा

साम्प्रतिक-समये एतासां प्रस्तावितानां योजनानां प्रावधानानाञ्च अन्तिमं स्वरूपम् अद्यावधि अनिश्चितं वर्तते। यदा आगामि-आय-व्ययक-पत्रे (बजट) ग्रामीणोद्योगान्, सूक्ष्म-लघु-प्रतिष्ठानानि, स्थानीय- नियोजनञ्च समधिकृत्य नूतनाः सर्वकारीयाः घोषणाः प्रकटीभविष्यन्ति, तदैव तेषां यथार्थस्वरूपं लाभान्वितानां संख्या च सुस्पष्टा भविष्यति।

# जमुई-सदर-चिकित्सालये द्वयोः रुग्णयोः मृत्युः; कार्यकालात् अनुपस्थिता प्राप्ता महिलावैद्या; मन्त्रिण्या प्रथम-सूचनापत्रस्य पञ्जीकरणाय प्रदत्तः निदेशः



**हिमसंस्कृतवार्ताः- राघव नाथ झा, जमुई।**

जमुई-मण्डल-सदर-चिकित्सालये उपचारकाले द्वयोः रुग्णयोः संजातायाः मृत्योः अनन्तरं चिकित्सालयस्य प्रशासनिकव्यवस्थां कार्यप्रणालीञ्च समधिकृत्य गम्भीराः प्रश्नाः समुत्थिताः। एतस्य प्रकरणस्य सूचनां प्राप्य बिहार-सर्वकारस्य मन्त्रिण्या श्रेयसी सिंहेन चिकित्सालयस्य स्थलीय- निरीक्षणं विहितम्। अस्मिन् अन्तरे एका महिला-चिकित्सिका स्व-कर्तव्यकाले अनुपस्थिता प्राप्ता, यस्मिन् मन्त्रिण्या तीव्रा अप्रसन्नता प्रदर्शिता तथा च सम्बद्धायाः वैद्यायाः विरुद्धं प्राथमिकीं पञ्जीकर्तुं स्पष्टादेशः प्रदत्तः। मन्त्रिण्या अधिकारिभ्यः रुग्ण-द्वयस्य मृत्योः समग्रं विवरणं संगृहीतं, समग्रस्य प्रकरणस्य च सूक्ष्म- अन्वेषणं विधाय उत्तरदायित्व-निर्धारणाय आदेशः दीयते स्म। सा प्रत्यपादयत् यत् सर्वकारीय- चिकित्सालयेषु समागच्छन्तः रुग्णाः ससमयमेव उत्तमां चिकित्सासुविधां प्राप्नुयुः इति प्रशासनस्य दायित्वम्। कार्यकाले चिकित्सकानाम् अनुपस्थितिः सर्वथा असहनीया अस्ति; प्रमादे जाते सति नियमानुसारेण कठोरा दण्डात्मिका च प्रक्रिया भविष्यति।निरीक्षणक्रमे चिकित्सालयस्य दैनन्दिन-व्यवस्थानां, वैद्यानाम् उपस्थितेः, रुग्णेभ्यः प्रदीयमानानाम् औषधोपचार-साधनानाञ्च समीक्षणं कृतम्। द्वयोः रुग्णयोः मृत्युं तथा च महिला-चिकित्सिकायाः कार्यकालाद् अनुपस्थितिं समधिकृत्य प्रचलन्त्याः प्रशासनीयायाः अन्वीक्षायाः अनन्तरमेव एतत् स्पष्टं भविष्यति यत् मृत्योः यथार्थं कारणं किम् आसीत्। कस्मिंश्चित् स्तरे च चिकित्सकीयः प्रशासकीयो वा प्रमादः अभवत् न वा।



# मानसूनस्य दुर्बलीकरणस्य मध्ये ऋतुविभागेन अतिवृष्टेः सचेतना

**हिमसंस्कृतवार्ताः- उत्तरप्रदेश।**

मानसूनस्य प्रभावः शनैः शनैः न्यूनः भवति, तथापि ऋतुविभागेन पुनः चिन्ताजनकः पूर्वानुमानः प्रकाशितः। ऋतुविभागस्य पूर्वानुमानानुसारं अक्तूबरमासस्य चतुर्थे दिवसे उत्तरप्रदेशः, बिहारः, दिल्ली, झारखण्डः इत्यादिषु चतुर्दशसु राज्येषु मुसलधारावृष्टेः चेतावनी प्रदत्ता अस्ति।अस्मिन् काले कतिपयेषु क्षेत्रेषु प्रति घण्टां ७० किलोमीटर- वेगेन प्रचण्डवायुः प्रवहति इति सम्भावना वर्तते। पर्वतीयेषु राज्येषु भू-स्खलनस्यापि सम्भावना व्यक्ता अस्ति। अतः यात्रायाः पूर्वं जनैः ऋतुविभागस्य नवीनतमं पूर्वानुमानं अवश्यं परीक्षितव्यम्।पूर्वमध्यप्रदेशे, पश्चिमबङ्गाले तथा तमिलनाडुराज्ये प्रचण्डवायोः कारणेन जनजीवनं प्रभावितं भवितुम् अर्हति। पूर्वभारते च कतिपयेषु राज्येषु विद्युत्पातस्य वज्रपातस्य च सम्भावना वर्तते। प्रतिकूलऋतोः प्रभावेन कृषकानां फसलानि अपि क्षतिग्रस्तानि भवितुं शक्नुवन्ति। ऋतुविभागेन मत्स्यजीविभ्यः समुद्रतटात् दूरं गत्वा सुरक्षितस्थलेषु निवासस्य परामर्शः प्रदत्तः अस्ति। बंगालस्य उपसागरे विद्यमानस्य प्रचण्डवायोः प्रभावः पूर्वभारतीयेषु क्षेत्रेषु जनजीवनं प्रभावितं कर्तुं शक्नोति। कतिपयेषु त्रिषु-चतुरेषु राज्येषु शिलावृष्टेः अपि सम्भावना वर्तते।केरलस्य तटसमीपे दक्षिण-पूर्वी-अरबसागरे ऊर्ध्ववायुमण्डले चक्रवाती परिसञ्चरणम् निर्मितम् अस्ति। तथैव दक्षिण-पश्चिमी-बङ्गालस्य उपसागरे अपि ऊर्ध्ववायुमण्डले चक्रवाती परिसञ्चरणं विद्यमानम् अस्ति। सिक्किमस्य समीपवर्तिषु क्षेत्रेषु अपि ऊर्ध्ववायुमण्डले चक्रवाती परिसञ्चरणस्य स्थितिः वर्तते। प्रतिकूलऋतोः सम्भावनां दृष्ट्वा जनसामान्येन सावधानी वर्तनीया, प्रशासनस्य एवं ऋतुविभागस्य निर्देशानां च पालनं करणीयम्।

# विधानपरिषद-निर्वाचने 'महागठबन्धने' कलहः तीव्रीभूतः

बिहार-विधानपरिषदस्य (MLC) निर्वाचनार्थं 'महागठबन्धनस्य' घटकदलयोः मध्ये मतभेदः प्रकटितः। काङ्ग्रेस-दलेन पञ्चसु आसनेषु स्वप्रत्याशिनां घोषणा कृता, यत्र पूर्वमेव राष्ट्रीय-जनता-दलेन (RJD) चतुर्षु आसनेषु प्रत्याशिनः उपस्थापिताः आसन्। अनेन कारणेन उभयोः मित्रपक्षयोः मध्ये 'मैत्रीपूर्ण-स्पर्धायाः' स्थितिः उद्भूता।

# ऊनायां सुन्दरनारायणगुरुकुले सुसम्पन्ना चतुर्थी राज्यस्तरीया शलाकापरीक्षा





**हिमसंस्कृतवार्ताः- ऊना।** संस्कृतभारती- हिमाचलप्रदेशः, केन्द्रीय-संस्कृत- विश्वविद्यालयः नवदेहली इत्यनयोः संयुक्ततत्त्वावधाने ऊना-मण्डलस्थे अम्बेहडाग्रामे स्थिते श्रीसुन्दरनारायणगुरुकुले चतुर्थी राज्यस्तरीया शलाकापरीक्षा सफला सती समुत्साहेन सम्पन्ना। इयं परीक्षा आश्विनकृष्णाष्टम्यां नवम्यां च (०३ तथा ०४ अक्तूबर २०२६) द्वयोः दिवसयोः आयोजिता। अस्मिन् राज्यस्तरीये कार्यक्रमे हिमाचलप्रदेशस्य विविधेभ्यः विद्यालयेभ्यः, महाविद्यालयेभ्यः, विश्वविद्यालयेभ्यः गुरुकुलेभ्यश्च आगताः षष्टिः संस्कृतच्छात्राः प्रतिभागं कृतवन्तः।

**अस्माकोन्नयनस्य उत्कर्षस्य च मार्गः संस्कृतेनैव गच्छति- पृथीपालसिंहः**

परीक्षायाः प्रथमदिने ०३ अक्तूबर २०२६ दिनाङ्के मध्याह्नोत्तरं कार्यक्रमस्य उद्घाटनं जातम्, उद्घाटने नगरनिगमस्य ऊनानगरस्य आयुक्तः पृथीपालसिंहः उपस्थितः आसीत्। असौ स्वीये सम्बोधने अवोचत् यत् वयं किमपि साधयामः तदा पश्यामः तत् सर्वं पूर्वमेव संस्कृतशास्त्रेषु सिद्धमस्ति। अतः अस्माकोन्नयनस्य उत्कर्षस्य च मार्गः संस्कृतेनैव गच्छति। उद्घाटनसत्रस्य अध्यक्षता संस्कृतभारत्याः हिमाचलप्रान्तस्य अध्यक्षेण डॉ. राजेशशर्मणा कृता। शलाकापरीक्षायाः संयोजकः डॉ. जयकृष्णः प्रास्ताविकं प्रस्तुतवान्। ततः परं कण्ठपाठपरीक्षाणाम् (अष्टाध्यायी, अमरकोषः, नीतिशतकं, मूलरामायणं, योगसूत्रं च) आयोजनम् अभवत्। द्वितीयदिने ०४ अक्तूबर २०२६ दिनाङ्के प्रातःकालात् व्याकरण-ज्योतिष-साहित्यविषयाणां शलाकात्रयम् उभयोः स्तरयोः श्रीमद्भगवद्गीतायाः कण्ठ-पाठपरीक्षा च सम्पन्ना। शलाकापरीक्षा त्रिषु चक्रेषु स्मृतिपरीक्षा, शास्त्रपरीक्षा, विशिष्टपरीक्षा च रूपेण सुव्यवस्थिता आसीत्।

**संस्कृतसेवया समाजसेवया च जीवने श्रेष्ठता आयाति- योगराजयोगी**

शलाकापरीक्षायाः सम्पूर्तिसत्रे मुख्यातिथिरूपेण जिलापरिषदः सदस्यः समाजसेवी संस्कृतानुरागी योगराजयोगी महोदयः उपस्थितः आसीत्। असौ अवदत् यत् अद्याहं यत्किमपि अस्मि तद् समाजसेवायाः संस्कृतसेवायाः च प्रतिफलं वर्तते। अस्माकं सौभाग्यं वर्तते यत् अस्मिन् क्षेत्रे आचार्येण शिवकुमारशास्त्रिणा श्रीसुन्दरनारायणगुरुकुलस्य स्थापना कृता तेनैव व्याजेन एतादृशाणां शास्त्रसंरक्षणशीलानां कार्यक्रमाणां दर्शनम् अत्र चतुर्वर्षेभ्यः जायते। संस्कृतभारतीद्वारा हिमाचले एतादृशाणि अद्वितीयानि कार्याणि क्रियन्ते एतदर्थं संस्कृतभारती अभिनन्दनीया वर्तते। कार्यक्रमस्य अध्यक्षता श्रीविश्वनाथ-संस्कृत- महाविद्यालयस्य पूर्वप्राचार्यचरः धनीरामसंगरः अकरोत् तत्रैव सारस्वतातिथिरूपेण संस्कृतभारत्याः हिमाचलप्रान्तस्य अध्यक्षः डॉ. राजेशशर्मा उपस्थितः आसीत्। कार्यक्रमस्य समापनसत्रे विभिन्नविषयेषु श्रेष्ठप्रदर्शनं कृतवद्भ्यः छात्रेभ्यः पुरस्काराः प्रमाणपत्राणि च प्रदत्तानि।

## प्रतियोगितायाः विजेतारः (परिणामाः)-

**१. व्याकरणशलाकापरीक्षा (लघुसिद्धान्तकौमुदी)**
प्रथमस्थानम्- करसोगतः शिवानी (पुरस्कारराशिः- ₹७१००)
द्वितीयस्थानम्- सोलनम्, अंजलि (पुरस्कारराशिः- ₹५१००)
तृतीयस्थानम्- स्वारघाटतः पूनमदेवी (पुरस्कारराशिः- ₹३१००)
प्रोत्साहनपुरस्कारः- करसोगतः सुजाता (पुरस्कारराशिः- ₹२१००)

**२. ज्योतिषशलाकापरीक्षा (सूर्यसिद्धान्तः)**
प्रथमस्थानम्- बलाहरतः अजीतकुमारः (पुरस्कारराशिः- ₹७१००)
द्वितीयस्थानम्- बलाहरतः सुरेन्द्रः (पुरस्कारराशिः- ₹५१००)
तृतीयस्थानम्- शिमला सरैणतः अक्षयः (पुरस्कारराशिः- ₹३१००)
प्रोत्साहनपुरस्कारः- करसोगतः फिरोजः (पुरस्कारराशिः- ₹२१००)

**३. साहित्यशलाकापरीक्षा (साहित्यदर्पणः)**
द्वितीयस्थानम्- डोहगीतः तमन्ना (पुरस्कारराशिः- ₹५१००)

**४. पाणिनीया अष्टाध्यायी (कण्ठपाठः)**
प्रथमस्थानम्- करसोगतः अनामिका (पुरस्कारराशिः- ₹७१००)
द्वितीयस्थानम्- बलाहरतः कनिका (पुरस्कारराशिः- ₹५१००)
तृतीयस्थानम्- चम्बातः हिम्मतसिंह (पुरस्कारराशिः- ₹३१००)
प्रोत्साहनपुरस्कारः- करसोगतः प्रियंका, (पुरस्कारराशिः- ₹२१००)

**५. अमरकोषः (कण्ठपाठः)**
प्रथमस्थानम्- करसोगतः वेदांशशर्मा (पुरस्कारराशिः- ₹७१००)
प्रोत्साहनपुरस्कारः- डोहगीतः शिवम शर्मा (पुरस्कारराशिः- ₹२१००)

**६. श्रीमद्भगवद्गीता (ज्येष्ठस्तरः)**
प्रथमस्थानम्- शिमला सरैणतः, स्मृतिः (पुरस्कारराशिः- ₹७१००)
तृतीयस्थानम्- शिमला सरैणतः तनुजा (पुरस्कारराशिः- ₹३१००)

**७. श्रीमद्भगवद्गीता (कनिष्ठस्तरः)**
द्वितीयस्थानम्- करसोगतः फलांशः (पुरस्कारराशिः- ₹१५००)
तृतीयस्थानम्- करसोगतः प्रियांशी (पुरस्कारराशिः- ₹११००)
प्रोत्साहनपुरस्कारः- शिमला सरैणतः आरुषी (पुरस्कारराशिः- ₹७००)

**८. नीतिशतकम् (कण्ठपाठः)**
प्रथमस्थानम्- शिमला सरैणतः अम्बिका (पुरस्कारराशिः- ₹२१००)
द्वितीयस्थानम्- करसोगतः प्रियंका (पुरस्कारराशिः- ₹१५००)
तृतीयस्थानम्- करसोगतः सृष्टिवर्मा (पुरस्कारराशिः- ₹११००)
प्रोत्साहनपुरस्कारः- बलाहरतः मनीषा (पुरस्कारराशिः- ₹७००)

**९. मूलरामायणम् (कण्ठपाठः)**
प्रथमस्थानम्- करसोगतः रिया (पुरस्कारराशिः- ₹२१००)
द्वितीयस्थानम्- बलाहरतः सिमरन (पुरस्कारराशिः- ₹१५००)
तृतीयस्थानम्- शिमला तुंगेशतः सूर्यांशशर्मा (पुरस्कारराशिः- ₹११००)
प्रोत्साहनपुरस्कारः- सरैणतः आयुषी (पुरस्कारराशिः - ₹७००)

**१०. योगसूत्रम् (कण्ठपाठः)**
प्रथमस्थानम्- करसोगतः झमीरसिंहः, (पुरस्कारराशिः- ₹२१००)
द्वितीयस्थानम्- बलाहरतः सिमरन (पुरस्कारराशिः- ₹१५००)
तृतीयस्थानम्- सुन्दरनगरतः दीपिका (पुरस्कारराशिः- ₹११००)

कार्यक्रमे प्रान्तशलाकापरीक्षासमित्याः संयोजकः डा. जयकृष्णशर्मा, सहसंयोजकः डॉ. एन. वैथि सुब्रह्मण्यन्, प्रान्तमन्त्री डॉ. ज्ञानेश्वरशर्मा सहप्रान्तमन्त्री ललित शर्मा, संस्कृतभारतीन्यासस्य न्यासीसदस्यः महेश्वरः शर्मा, परीक्षासमित्याः अन्ये सदस्याः, विद्वांसः, मार्गदर्शकाध्यापकाः गुरुकुलस्य आचार्याश्च उपस्थिताः आसन्।



**हिमसंस्कृतवार्ताः, ईदरधीरजः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। मया काचित् विचित्रवार्ता श्रुता। कयाचित् कर्मकर्त्र्या उदररोगस्य मिषं कृतम्। किन्तु तया कूर्ग-नगरं गतम्। तत्र तस्याः नृत्य-चलच्चित्रं प्रबन्धकेन अन्तर्जाले दृष्टम्।

**काव्या-** हह! तया महती मूर्खता कृता! अन्या वार्ता रोमनगरस्य विषये मया पठिता। तत्र पर्यटकैः मार्गेषु लघूनि गोल्फ-क्रीडा-शकटानि चालितानि। नगरस्य मार्गाः तैः शकटैः अवरुद्धाः। स्थानीयजनैः महान् कोपः प्रकटितः।

**नन्दिनी-** सत्यम्, तेषां शकटानां बाधया स्थानीयाः पीडिताः। अधुना काचित् सर्प-वार्ता मया स्मृता। मेट- ओपेरा-संस्थया नाटकनिमित्तं सजीवानां सर्पाणां परीक्षणं कृतम्। तत्र एका विशाला सर्पिणी मुख्यपात्राय वृता।

**काव्या-** अहो आश्चर्यम्! सर्पाय अपि नाटक-पात्रं दत्तम्! अन्ते अन्तरिक्ष-यात्रिकाणां विषये वार्ता मया प्राप्ता। अन्तरिक्षे तेषां मलबद्धता-रोगस्य रहस्यं वैज्ञानिकैः ज्ञातम्। गुरुत्वाकर्षण-अभावे उदरस्य जीवाणुभिः परिवर्तनं कृतम्।

# शिक्षाक्षेत्रे सामाजिकसेवायां संस्कृतिसंवर्धने च उत्कृष्टयोगदानाय डॉ. सुमनराण्यै 'श्रेष्ठशिक्षकपुरस्कारः'



**महेन्द्रगढम्/रेवाडी, ४ अक्तूबर २०२६।** अन्तर्राष्ट्रीयशिक्षकदिवसस्य उपलक्ष्ये केन्द्रीयार्ययुवकपरिषद् रेवाडीः तथा पतञ्जलिपरिवारः रेवाडी इत्यनयोः संस्थयोः संयुक्ततत्त्वावधाने आयोजिते सम्मानसमारोहे डॉ. सुमनराण्यै अयं प्रतिष्ठितः पुरस्कारः प्रदत्तः।शिक्षाक्षेत्रे, सामाजिकसेवायां, पर्यावरणसंरक्षणे, भारतीयसंस्कृतेः संवर्धने च विशिष्टयोगदानस्य कृते हरियाणाकेन्द्रीयविश्वविद्यालयस्य महेन्द्रगढस्य संस्कृतविभागे सहायकाचार्यरूपेण कार्यरता तथा स्वामिदयानन्दसरस्वतीपीठस्य पीठाध्यक्षा डॉ. सुमनराणी 'श्रेष्ठशिक्षकपुरस्कारेण' सम्मानिता। अस्मिन् कार्यक्रमे हरियाणासर्वकारस्य माननीयः शिक्षामन्त्री श्रीमहिपालढाण्डा मुख्यातिथिरूपेण तथा रेवाडीनगरस्य माननीयः विधायकः श्रीलक्ष्मणयादवः विशिष्टातिथिरूपेण उपस्थितौ आस्ताम्। उभाभ्याम् अपि डॉ. सुमनराण्याः शैक्षणिक-सामाजिक-सांस्कृतिककार्याणां मुक्तकण्ठेन प्रशंसा कृता तथा तस्यै अस्याः गौरवपूर्णोपलब्धेः हार्दिकाः शुभकामनाः प्रदत्ताः।सम्मानपत्रे डॉ. सुमनराण्याः शिक्षाक्षेत्रे सामाजिकक्षेत्रे च अमूल्ययोगदानस्य उत्कृष्टकार्याणां च विशेषतया प्रशंसा कृता। शिक्षायाः माध्यमेन समाजे जागरूकतायाः प्रसारः, भारतीयसंस्कृतेः संरक्षणं संवर्धनं च, पर्यावरणस्य संरक्षणं तथा विद्यार्थिषु नैतिकमूल्यानां संस्काराणां च विकासः इत्येतेषु क्षेत्रेषु तया क्रियमाणानां प्रयत्नानां विशेषः उल्लेखः कृतः।

## ज्ञानसंस्कारसंस्कृतीनां समन्वयेन शिक्षाकार्यम्

डॉ. सुमनराणी शिक्षा केवलं ज्ञानप्राप्तेः साधनं न मन्यते, अपि तु ज्ञानस्य, संस्कारस्य, संस्कृतेः, सामाजिकदायित्वस्य च समन्वितं माध्यमम् इति मन्यते। संस्कृतभाषायाः, भारतीयज्ञानपरम्परायाः, वैदिकवाङ्मयस्य च क्षेत्रेषु तस्याः शैक्षणिकं शोधपरकं च योगदानं उल्लेखनीयम् अस्ति।स्वामिदयानन्दसरस्वतीपीठस्य अध्यक्षा इति दायित्वं निर्वहन्ती सा भारतीयज्ञानपरम्परायाः, वैदिकचिन्तनस्य, संस्कृतभाषायाः तथा भारतीयसंस्कृतेः संरक्षण-संवर्धनाय निरन्तरं प्रयतते। तस्याः नेतृत्वे विविधाः शैक्षणिकाः, शोधपरकाः, सांस्कृतिकाः सामाजिकाश्च कार्यक्रमाः सफलतया आयोजिताः नमस्ते ।

## विश्वविद्यालयस्य शीर्षाधिकारिभिः हार्दिकाः शुभकामनाः

डॉ. सुमनराण्याः अस्याः उपलब्धेः विषये हरियाणाकेन्द्रीयविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. टंकेश्वरकुमारः, माननीयः समकुलपतिः प्रो. पवनकुमारशर्मा तथा माननीयः कुलसचिवः प्रो. सुनीलकुमारः तस्यै हार्दिकं वर्धापनम् शुभकामनाश्च प्रेषितवन्तः। तैः उक्तं यत् डॉ. सुमनराण्याः शिक्षाक्षेत्रे, अनुसन्धाने, सामाजिकसेवायां तथा भारतीयसंस्कृतेः संवर्धने च निरन्तरं क्रियमाणं योगदानं विश्वविद्यालयस्य प्रतिष्ठां वर्धयति।

**गौरवपूर्णा उपलब्धिः**- 'श्रेष्ठशिक्षकपुरस्कारः' डॉ. सुमनराण्याः शैक्षणिकसमर्पणस्य, सामाजिक-प्रतिबद्धतायाः, सांस्कृतिकनिष्ठायाः च महत्त्वपूर्णा स्वीकृतिः अस्ति। अनेन सम्मानेन संस्कृतविभागे, स्वामिदयानन्दसरस्वतीपीठे, सम्पूर्णे विश्वविद्यालय परिवार च हर्षोल्लासस्य वातावरणं वर्तते। अयं सम्मानः न केवलं डॉ. सुमनराण्याः व्यक्तिगतस्य योगदानस्य गौरवम्, अपि तु शिक्षया समाजस्य, संस्कृतेः, राष्ट्रस्य च उत्थानाय क्रियमाणानां सततप्रयत्नानां सम्मानः अपि अस्ति। सर्वे तस्यै भविष्ये अपि नूतनानां उपलब्धीनां कृते हार्दिकाः शुभकामनाः अर्पयन्ति।




रविः खरिडेहालः – बेङ्गलूरु

## "के-एस्-टी-डी-सी संस्था, "चक्रेषु आतिथ्यं" इति कार्यक्रमं कल्पितवान् अस्ति"

के-एस्-टी-डी-सी संस्था कर्नाटक राज्यस्य पर्यटनस्य अनुभवः पर्यटकानुभवस्य च उन्नयनार्थं बहिः अतिथिगृहेषु आतिथ्यसेवाः नेतुम् योजनां कुर्वती अस्ति। अस्य कार्यक्रमस्य कृते केएसटीडीसी मयूरा अतिथि गृहाणाम् समूहस्य इत्यनेन सह सम्बद्धः अस्ति । इयं चल-उपक्रमः राज्यस्य पर्यटनस्थलेषु गुणवत्तापूर्णाहार-सेवाप्रदानाय अस्ति। सेवा पर्यटनस्थानस्य स्थानीयभोजनस्य च मेलनं करिष्यति। तेन जागरूकता प्रसारिता। केएसटीडीसी सम्प्रति २४ मयूरा-अतिथिगृहाणि संचालयति, पर्यटनस्थलेभ्यः दूरं च स्थितानि सन्ति । चक्राणां उपरि मयूरा-रुचि इत्यनेन सह केएसटीडीसी मयुरा-अतिथिगृहाणां स्वादं गुणवत्तां च आगन्तुकानां कृते नेतुम् इच्छति।कार्याणां अन्येषां च सम्बद्धव्यापाराणां कृते स्थानीयभोजनस्थानीयावकाशानां उपरि बलं दत्त्वा।

## जलप्लावन-प्रभावित-क्षेत्रेषु साहाय्य-कार्याणि तीव्रीकृतानि

नेपाल-देशे तथा उत्तर-बिहारे सन्तत-वृष्ट्या गण्डक-कोशी-नद्योः जलस्तरः प्रवृद्धः। सारण-वैशाली-प्रभृतिषु जनपदेषु जलप्लावनस्य सङ्कटः वर्धितः। राज्य-प्रशासनेन एनडीआरएफ (NDRF) तथा एसडीआरएफ (SDRF) दलैः सह साहाय्य-सामग्री-वितरणम् उद्धार-कार्याणि च द्रुतगत्या क्रियन्ते।

## गयायां 'पितृपक्ष-मेलायाम्' अन्ताराष्ट्रिय-श्रद्धालूनां समागमः

पवित्रे तीर्थक्षेत्रे गयायां पितृपक्ष-महामेलायाम् अशेष-भारतात् तथा विदेशेभ्यः अपि सहस्रशः भक्ताः स्वपितॄणां मुक्तये पिण्डदानं कुर्वन्ति। रूस-फ्रान्स-जर्मनी-प्रभृति-देशेभ्यः आगताः विंशतितः अधिकाः विदेशी-श्रद्धालवः अपि सनातन-परम्परानुसारं पिण्डदान-तर्पण-कर्म सम्पादितवन्तः।

## मद्यतस्कराणां विरुद्धं आरक्षक-बलस्य कठोर-कार्याचरणम्

राज्ये मद्यनिषेध-नियमस्य उल्लङ्घनकर्तॄणां विरुद्धं आरक्षक-प्रशासनेन अभियानं तीव्रं कृतम्।

# प्रेमचन्दशरतचन्द्रस्मृतिप्रतियोगितायां १८० विजेतारः सम्मानिताः



**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, भागलपुरम्**

अद्यतनस्य अन्तर्जालीययुगस्य सामाजिक-माध्यमानां च आकर्षणस्य मध्ये नवसन्ततेः साहित्ये पठनसंस्कृतौ च रुचिं वर्धयितुं भागलपुरे प्रेमचन्द-शरतचन्द्र-स्मृतिसमित्याः तत्त्वावधाने आयोजितस्य प्रेमचन्द- शरतचन्द्र- स्मृति-प्रतियोगितायाः २०२६ पुरस्कारवितरणसमारोहः भव्यतया सम्पन्नः अभवत्। अस्मिन् अवसरे १८० सफलप्रतिभागिनः प्रमाणपत्रैः साहित्यिकपुस्तकैश्च सम्मानिताः। समारोहस्य वातावरणं साहित्यिक-चेतनया परिपूर्णमासीत्। मुंशीप्रेमचन्दस्य शरतचन्द्र- चट्टोपाध्यायस्य च कालजयीकृतयः बालकैः भाषणेषु, निबन्धेषु, काव्यपाठेषु, गीतगायने, चित्रकलायां प्रभावशालिरूपेण प्रस्तुताः। विजेतॄणां सम्मानसमये सभास्थले करतलध्वनिः गुञ्जितः अभवत्। उल्लेखनीयं यत् प्रेमचन्द- शरतचन्द्र- स्मृतिसमित्या १९९७ तमवर्षात् साहित्यिकप्रतिभानां प्रोत्साहनाय इदम् अभियानं निरन्तरं सञ्चाल्यते। अस्मिन् वर्षे भागलपुरस्य विभिन्नेषु सर्वकारीयेषु निजीषु च विद्यालयेषु, महाविद्यालयेषु विश्वविद्यालयेषु च अध्ययनरताः ८८० संख्यकाः छात्राः छात्राश्च प्रतियोगितायां भागं गृहीतवन्तः। प्रथमकक्षायाः बालकेभ्यः आरभ्य स्नातक-स्नातकोत्तरस्तरपर्यन्तं विद्यार्थिभ्यः भाषणं, निबन्धलेखनं, काव्यपाठः, गीतगायनम्, चित्रकला, प्रश्नोत्तरी इत्यादयः विविधकार्यक्रमाः आयोजिताः अभवन्।

प्रतियोगितानां माध्यमेन विद्यार्थिभिः न केवलं स्वप्रतिभायाः प्रदर्शनं कृतम्, अपि तु हिन्दी-बाङ्गला- साहित्ययोः समृद्धपरम्परायाः तथा महतां साहित्यकाराणां विचाराणां च परिचयः प्राप्तः। एतेन विद्यार्थिनां पठनशीलता, चिन्तनशक्तिः तथा सृजनात्मकप्रतिभा च विकसितुम् अवसरः प्राप्तः। समारोहस्य मुख्याकर्षणम् आसीत् 'रङ्गग्राम जनसांस्कृतिकमञ्च' इत्यस्य कलाकारैः प्रस्तुतं सुप्रसिद्धव्यङ्ग्यकारस्य हरिशङ्कर-परसाईमहोदयस्य 'नरकात् वदामि' इति नाटकम्। कपिलदेवरङ्गस्य निर्देशनं तथा सुनीलरङ्गस्य प्रमुखभूमिकायां कृतः सजीवाभिनयः दर्शकान् विशेषतया आकर्षितवान्। सामाजिककुरीतीनां सामाजिकपाखण्डस्य च उपरि तीक्ष्णं प्रहारं कुर्वन्ती एषा नाट्यप्रस्तुतिः दर्शकानां मुक्तकण्ठेन प्रशंसाम् अलभत। करतलध्वनिभिः सभास्थलं मुखरितमभवत्। मुख्यातिथिः डॉ. फारूक अलीमहोदयः विद्यार्थिनः सम्बोधयन् अवदत्- "साहित्यं मानवहृदये संवेदनां करुणां च जनयति।" साहित्यस्य अध्ययनं मानवस्य व्यक्तित्वविकासे नैतिकमूल्यसंवर्धने च महत्त्वपूर्णां भूमिकां निर्वहति। विशिष्टातिथिरूपेण टी. एन. बी. महाविद्यालयस्य प्राचार्यः प्रो. दीपो महतो, डॉ. वसीमरज़ा, राजीवकान्तमिश्रः, डॉ. नवीननिकुञ्जः, डॉ. योगेन्द्रः, प्रकाशचौधरी तथा डॉ. पुलकित आनन्दः उपस्थिताः आसन्। अतिथिभिः विद्यार्थिनः साहित्यपठनाय, चिन्तनाय, सृजनात्मककार्येषु सक्रियभागग्रहणाय प्रेरिताः। वक्तारः अवदन् यत् अन्तर्जालस्य सामाजिकमाध्यमानां च प्रभावे बालकानां साहित्याभिमुखतां संरक्षितुं समाजस्य महत्त्वपूर्णं दायित्वम् अस्ति। प्रेमचन्दस्य 'ईदगाह' इत्यादीनां कृतिनां, शरतचन्द्रस्य संवेदनापूर्णस्य साहित्यस्य अध्ययनं बालकेषु मानवीयसंवेदनां सामाजिकचेतनां च विकसितुं समर्थम् अस्ति।

आयोजनस्य सफलतायां समितेः अध्यक्षस्य तापस घोषस्य, सचिवस्य रविकुमारसिंहस्य, संरक्षकस्य तरुणघोषस्य, उपाध्यक्षस्य प्रकाशचौधरी इत्यस्य शान्तनु गाङ्गुलीत्यस्य, दीपक कुमारस्य, सुनीलकुमाररङ्गस्य, प्रणवस्य, कपिलदेव रङ्गस्य च योगदानं प्रशंसनीयम् आसीत्। समारोहोऽयं केवलं पुरस्कारवितरणकार्यक्रमः न भूत्वा साहित्य-पठनस्य, चिन्तनस्य सृजनशीलतायाश्च संस्कार-वर्धनस्य प्रभावशाली माध्यमं सिद्धम् अभवत्। आयोजकैः साहित्यकाराणां स्मृतौ प्रवर्तितमिदम् अभियानं भविष्येऽपि अधिकव्यापकतया सञ्चालयितुं संकल्पः प्रकटितः।



## "संस्कृतकथामञ्जरी" {२७} (१) द्वात्रिंशत्पुत्तलिकासिंहासनम् "अथ अष्टमहासिद्धिलाभो नाम एकविंशोपाख्यानम्"

पुनरपि राजा यावत् सिंहासने समुपवेष्टुमुपक्रमते तावदन्या पुत्तलिका तं निवार्य्य भणति- तेनात्र सिंहासने उपवेष्टव्यं यस्य विक्रमस्येव औदार्य्यं विद्यते। राजा अवदत्- कथय तस्य विक्रमस्यौदार्य्यवृत्तान्तम्।

सा अब्रवीत्- श्रूयतां राजन्! विक्रमे राज्यं शासति बुडिसिन्धुनामा कश्चित मन्त्री आसीत्। तस्य च अन्तर्गलो नाम पुत्र बभूव। स घृतीदनं भुञ्जा कुमारवृत्त्या तिष्ठति, किमपि विद्याऽभ्यसनं न करोति। एकदा पित्रा भणितं- भो अनर्गल! त्वं ममोरसाञ्जातोऽपि अतीव दुर्विदग्धः विद्याऽभ्यासनं न करोषि, हृदयशून्यो मूर्खः सन् तिष्ठसि। यस्तु हृदयशून्यः स मूर्ख एव। उक्तञ्च-

**"अपुत्रस्य गृहं शून्यं शून्यादेशो ह्यबान्धवः।**
**मूर्खस्य हृदयं शून्यं सर्वशून्या दरिद्रता ||"**

एतत् पित्रुवचनं श्रुत्वा पश्चातापयुक्तः अनर्गलः वैराग्यम् अवलम्बः देशान्तरं जगाम्। तत्र एकस्मिन् नगरे कस्यचित् उपाध्यायस्य सकाशात् सकलं नीतिशास्त्रं पठित्वा निजनगरं प्रति गन्तुंप्राक्रमत्। मार्गे च अरण्यमध्ये देवालयमेकमपश्यत्। तद्देवालयेसमीपे पद्मिनीवण्डमण्डितं चक्रवाकयुगयुतम् अतिविमलोदकं सरः आसीत्। तस्य च सरोवरस्य एकदेशे अतिसन्तप्तमुदकम् अस्ति। एतत् सर्वं दृष्ट्वा अनर्गले तत्रोपविष्टे सूर्य्योऽस्तं गतः। तदन्तरं मध्यरात्रसमये तस्मात् सन्तप्तोदकमध्यात् अष्टौ दिव्याः स्त्रियः निर्गताः देवालयं गत्वा देवस्याभिषेकादि षोडशोपचारं कृत्वा च नृत्यगीतादिकलया देवं तोषयामासुः। ततो देवः प्रसन्नः समर्श्वयित्रीभ्यः ताभ्यः प्रसादमदात्। एतत् सर्व्वमनर्गलोऽपि अपश्यत्। अथ प्रभाते निर्गमनसमये ताभिरनर्गलो दृष्टः ततश्च तासां मध्ये एकया दिव्याङ्गनया भणितं- भो सौम्य! एहि [आगच्छ] अस्माकं नगरं प्रति। इत्युक्त्वा सा सहचरीभिः सह सन्तप्तोदकमध्ये प्रविष्टा। सोऽपि तया सह गन्तुम् इयेव [अभिलषितवान्] परं तत्र तस्यां प्रविष्टायाम् अनर्गलो भयाच प्रवेष्टुं शशाक।

अथ स्वनगरमागत्य पित्रादिसर्वबन्धुजनान् अपश्यत्। तेन तेषां महानुत्सवो जातः। अथ स द्वितीयदिवसे राजसन्दर्शनार्थं राजसभां गत्वा, राजानमभिवाद्य उपविष्टः। राज्ञा कुशलं पृष्टोक्तं- भो अनर्गल! एतावन्ति दिनानि कुत्र स्थितोऽसि? तेनोक्तं- विद्याऽभ्यासं कर्तुं देशान्तरं गतोऽस्मि। राज्ञोक्तं- तत्र देशान्तर किं किमपूर्व्वं दृष्टम्? अनर्गलेन च राज्ञे सन्तप्तोदकवृत्तान्तः कथितः। क्रमशः......

**डा. वर्षा प्रकाश टोणगांवकर,पुणे, महाराष्ट्रम्**